BESANT EVENING COLLEGE
LIBRARY, MANGA... 

Reg. No. 

**BCMSKLN 101**

**First Semester B.Com. Degree Examination, February/March 2023**
**(NEP 2020) (2021 – 22 Batch Onwards)**
**SANSKRIT LANGUAGE**
**(AECC)**

Time : 2 Hours                                                    Max. Marks : 60

*सूचना : 1) **संस्कृतभाषया, कर्णाटकभाषया, आङ्ग्लभाषया** वा उत्तराणि लिखत ।*
*2) प्रश्नसंख्या **IV** तथा **V** एतयोः उत्तराणि **संस्कृतभाषया** एव लेखनीयानि ।*

I. **एकं** अनुवादं कृत्वा विवृणुत ।                                                    **(1×5=5)**

1) रामो नाम बभूव हुं तदबला सीतेति हुं तौ पितुः
वाचा पञ्चवटी वने विहरतस्तामाहरद्रावणः ।
निद्रार्थं जननी कथामिति हरेर्हुंकारतः श्रुणवतः
सौमित्रे क्व धनुर्धनुर्धनुरिति व्यग्रागिरः पातु नः ।।

2) श्यामास्वङ्गं चकितहरिणी प्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति ।।

II. **चत्वारि** वाक्यानि सप्रसङ्गं विवृणुत ।                                                    **(4×3=12)**

1) नैवाश्रितेषु महतां गुणदोषशङ्का ।

2) भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः ।

3) यश्च क्रुध्यन्त्यनीशानः स च मूढतमो नरः ।

4) न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।

5) ये निर्दयं त्वां परिमर्दयन्ति तानेव धृत्वा शिरसा प्रयासि ।

6) त्वं सर्वतोगामि च साधकं च ।

**P.T.O.**

**BCMSKLN 101**

(3×8=24)

III. **त्रीन्** प्रश्नान् प्रबन्धरूपेण उत्तरयत ।

1) जाबालिमहर्षेः वचः श्रुत्वा श्रीरामः किम् आह ? विवृणुत ।

2) विदुरोक्तिषु नीतेः महत्वं निरूपयत ।

3) देवेन्द्रः मन्मथं प्रति किम् आह ? विलिखत ।

4) श्रीकृष्णस्य काश्चित् चतस्रः लीलाः यथापाठ्यं वर्णयत ।

5) यथारुचि अन्योक्तिचतुष्टयं चित्रकाव्यं पाठोक्तदिशा विवृणुत ।

(1×4=4)

IV. **एकं** संस्कृतेन टिप्पणीं लिखत ।

1) वाल्मीकिः ।

2) सुभाषितानि ।

3) किरातार्जुनीयम् ।

(15×1=15)

V. निर्देशानुसारं **पञ्चदश**वाक्यानि पूरयत ।

अ) युक्तं नामपदं विलिख्य वाक्यं पूरयत ।

1) चन्द्रो नाम __________ प्रतिवसति स्म । (भूपतिं, भूपतिना, भूपतिः)

2) वानरः विषादेन __________ वनम् अटति । (वनात्, वने, वनेन)

3) तदिदम् __________ दीपनीराजनम् । (आदित्यात्, आदित्यस्य, आदित्येन)

4) रामः __________ पाणिं जग्राह । (सीतां, सीतया, सीतायाः)

आ) युक्तं सर्वनामपदं विलिख्य वाक्यं पूरयत ।

5) मम कुलक्षयः __________ कृतः । (तव, त्वम्, त्वया)

6) राघवाय __________ सुतां गृहाण । (मयि, मम, मया)

7) __________ पवित्रदर्शनं फलप्रदं मन्ये । (त्वं, तव, तुभ्यम्)

8) प्रजापतिः __________ प्रोवाच । (तस्य, तेन, तस्मै)

इ) समुचितं क्रियापदं विलिख्य लिखत ।

9) चन्दनपादपान् सः __________ । (अपश्यम्, अपश्यन्, अपश्यत्)

10) केचित् पुण्याय कर्म __________ । (करोति, कुरुथ, कुर्वन्ति)

11) मम क्षत्रोचिता गतिः __________ । (भविष्यामि, भविष्यसि, भविष्यति)

12) एकेन तव युद्धम् __________ । (सन्तु, अस्तु, असि)

ई) युक्तं पदम् अन्विष्य प्रयोगं पूरयत ।

13) मया भागवतं पठ्यते ।
__________ भागवतं पठामि । (अहं, त्वम्, वयम्)

14) कुपितेन तेन शापः दत्तः ।
कुपितः सः शापं __________ । (दत्तवान्, दत्तम्, दत्तवती)

15) सूर्यः प्रकाशं ददाति ।
__________ प्रकाशः दीयते । (सूर्यस्य, सूर्याय, सूर्येण)

16) अस्य प्रभावं त्वं जानीषे ।
अस्य प्रभावः त्वया __________ । (ज्ञायन्ते, ज्ञायते, ज्ञाये)

उ) युक्तं विभक्तिरूपं लिखत ।

17) 'माया' – शब्दस्य तृतीयाविभक्तेः बहुवचनरूपम् __________ ।
(मायाः, मयया, मायाभिः)

18) 'मुनि' – शब्दस्य द्वितीयाविभक्तेः बहुवचनरूपम् __________ ।
(मुनीन्, मुनयः, मुनिषु)

19) 'अस्मद्' – शब्दस्य षष्ठीविभक्तेः एकवचनरूपम् __________ ।
(मयि, माम्, मम)

20) 'तद्' – पुल्लिङ्गशब्दस्य षष्ठीविभक्तेः बहुवचनरूपम् __________ ।
(तेषां, तस्य, तेषु)

---